199544

**34105**

Reg. No. [ ][ ][ ][ ][ ][ ][ ][ ]

# I Semester B.Com.B.Com Honors/BCH(N)/BCLS/BCTT Degree Examination, August - 2021

## SANSKRIT

### Janaki Haranam - I Canto, Grammar & Comprehension

### Paper - I

### (CBCS Scheme 2019-20 and onwards Freshers & Repeaters)

**Time : 3 Hours** **Maximum Marks : 70**

**Instructions to Candidates:-**

1) Answer in Sanskrit/ Kannada /English.
2) Question. No. I,V and VI Should be answered in Sanskrit.

BMSCW LIBRARY

**I. समीचीनम् उत्तरं चिनुत।** **(10×1=10)**

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.

Select the Correct answer.

1) कुमारदासः कस्य देशस्य राजा?
   अ) सिंहल आ) अङ्ग इ) वङ्ग ई) कोसल।
2) जानकीहरणं किं प्रकारकं काव्यम्?
   अ) खण्डकाव्यम् आ) महाकाव्यम् इ) सन्देशकाव्यम् ई) स्तोत्रकाव्यम्।
3) कुमारदासस्य पिता कः?
   अ) राजमणिः आ) कृष्णमणिः इ) कुमारमणिः ई) हरिमणिः।
4) अनन्तभोगाश्रयी कः?
   अ) रामः आ) दिलीपः इ) अजः ई) दशरथः।
5) इन्द्रद्विषद्भर्ता कः?
   अ) रावणः आ) मारीचः इ) स्वरः ई) दूषणः।
6) दशरथः किमर्थं वनं जगाम?
   अ) विनोदार्थं आ) मृगयार्थं इ) वासार्थं ई) विहारार्थं।
7) भवानी का?
   अ) लक्ष्मीः आ) सरस्वती इ) पार्वती ई) इन्द्राणी।

P.T.O.

8) शिखिनां तोषं किं ततान?

अ) पताकं  आ) वृक्षः  इ) मेघः  ई) आकाशः

9) पुरूषोत्तमेन तेन किं न तेने?

अ) अलसत्वं  आ) क्रोधं  इ) अर्थं  ई) लोभं

10) द्विपाः किम् आलोक्य कृतवन्ध्यघाताः?

अ) परबिम्बं  आ) स्वबिम्बं  इ) रविबिम्बं  ई) चन्द्रबिम्बं

**II द्वयोः प्रश्नयोः उत्तरं लिखत।** **(2×10=20)**

ಎರಡು ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಿಸಿ.

Answer any **two** questions.

1. अयोध्यानगरस्य वर्णनम् अधिकृत्य लिखत।

ಅಯೋಧ್ಯಾನಗರದ ವರ್ಣನೆಯನ್ನು ಕುರಿತು ಪ್ರಬಂಧ ಬರೆಯಿರಿ.

Write an essay on the Description of city Ayodhya

BMSCW LIBRARY

2. जानकीहरणस्य कर्तुः देशकालजीवनकृतीः अधिकृत्य लिखत।

ಜಾನಕೀ ಹರಣದ ಕರ್ತೃವಿನ ದೇಶ, ಕಾಲ, ಜೀವನ ಹಾಗೂ ಕೃತಿಗಳನ್ನು ಕುರಿತು ಬರೆಯಿರಿ.

Write an essay on place, date, life and works of Author of Janakiharanam.

3. दशरथस्य वर्णनं कुरूत।

ದಶರಥ ಹಾಗೂ ಅವನ ದಿಗ್ವಿಜಯದ ವರ್ಣನೆಯನ್ನು ಕುರಿತು ಬರೆಯಿರಿ.

Give an account of the description of Dasharatha and his expedition.

**III त्रयाणां श्लोकानाम् अनुवाद कृत्वा विवृणुत।** **(3×4=12)**

ಯಾವುದಾದರೂ ಮೂರು ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ.

**Translate and explain any Three of The Shlokas.**

1) दिहक्षुरन्तः सरसीमलङ्घ्यं
    यत्खातहंसः समुदीक्ष्य वप्रम्।
सस्मार नूनं हढक्रौञ्चकुञ्ज
    भागच्छिदो भार्गवमार्गणस्य।।

2) प्रवालशीर्षा वदनं सुवर्णं

मुक्तामयाङ्गावयवा वहन्त्यः।

यस्यां युवत्यो विहिता विधात्रा

रत्नैरिवापुर्वपुषः प्रकर्षम्॥

3) दण्डस्ततस्तस्य भुवं जिगीषोः

कम्पं वितन्वन् विहिताङ्गमर्दः।

तापैकहेतुस्त्रिदशाधिपस्य

दिशं ज्वरस्तीव्र इवाविवेश॥

4) सुमन्त्रसूतस्य सुमित्रयाग्नौ

पाणिग्रहं लम्भितया द्विजेन।

पुण्यं भवान्या भवहस्तसक्त

हस्ताम्बुजाया वपुराललम्बे॥

5) एकं त्वया साधयतापि लक्ष्यं

नीतं विनाशं त्रितयं निरागः।

मच्चक्षुषा कल्पितदृष्टिकृत्यौ

वृध्दौ वने मे पितरावहश्च॥

BMSCW LIBRARY

IV द्वयोः सन्दर्भं विवृणुत। (2×4=8)

ಯಾವುದಾದರೂ ಎರಡರ ಸಂದರ್ಭವನ್ನು ಬರೆಯಿರಿ.

**Annotate any two of the following.**

1) जागाम रोषादिव लोहितत्वम्।

2) करोति यत्र ध्वजकृत्यमभ्रम्।

3) वह्नेः समक्षं विधिवद्विधेया।

4) बभूव रक्षोभयनाशहेतुः।

**V संस्कृत भाषया उत्तराणि लिखत।**

ಸಂಸ್ಕೃತ ಭಾಷೆಯಲ್ಲಿ ಉತ್ತರಿಸಿ.

**Answer in Sanskrit.**

अ) पञ्चानां सन्धिं विभज्य नाम लिखत। (5×1=5)

1) हिमालयः 2) एकैकम्

3) रामोऽपि 4) देवर्षिः

5) द्वावपि 6) इत्यवदत्

7) महौषधम् 8) सूर्योदयः

आ) पञ्चानां लकार-पुरूष-वचनानि लिखत। (5×1=5)

1) आसीत् 2) पठसि

3) बभासे 4) वदतु

5) गमिष्यति 6) लिखेत्

7) वदामः 8) वर्तते

BMSCW LIBRARY

**VI इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** (5×2=10)

छात्राणाम् अध्ययनं तपः इति अस्माकं पूर्वजैरूक्तम् अस्ति। अस्माकं जीवने ब्रह्मचर्यं, गार्हस्थ्यं, वानप्रस्थं तथा संन्यासः चेति चत्वारः विभागाः सन्ति। तत्र ब्रह्मचर्याश्रमः जीवनस्य प्रथमं सोपानमस्ति। अस्याम् अवस्थायां शरीरस्य सर्वे अवयवाः वर्धन्ते। अस्यामेव अवस्थायां यादृशाः संस्काराः प्ररोहन्ति तादृशम् एव जीवनं सिध्यति। अत एव अस्याम् अवस्थायां बालकानाम् अभिभावकाः सावधानेन स्वबालकानां सर्वथा अभिवृद्धये प्रयत्नशीला भवेयुः। प्राचीने भारते ब्रह्मचारिणः गुरू कुले वसन्ति स्म। भगवान् श्रीकृष्णः अपि सान्दीपनेः आश्रमे न्यवसत्।

प्रश्नाः-

1) अस्माकं पूर्वजैः किमुक्तमस्ति?

2) अस्माकं जीवने कति विभागाः सन्ति?

3) कस्याम् अवस्थायां शरीरस्य अवयवाः वर्धन्ते?

4) प्राचीने भारते ब्रह्मचारिणः कुत्र वसन्ति स्म?

5) श्रीकृष्णः कस्य आश्रमे न्यवसत्?